ISSN: 0587-1646

# अन्वीक्षा

# ANVĪKṢĀ

## RESEARCH JOURNAL OF THE DEPARTMENT OF SANSKRIT

[PEER REVIEWED JOURNAL]

VOLUME XLIV

RITA CHATTOPADHYAY COMMEMORATION VOLUME

PART II

GENERAL EDITOR

PROF. TAPAN SANKAR BHATTACHARYYA

JOINT EDITOR

PROF. KAKALI GHOSH

JADAVPUR UNIVERSITY

KOLKATA 700 032

JANUARY 2023

# मथुरानाथदिशा *तत्त्वचिन्तामणेः* व्याघ्रव्याप्तिलक्षणविमर्शः

रिया-पालः

**सारसंक्षेपः**

सर्वे दार्शनिका हि स्वेषां मतं प्रमाणेन समर्थयन्ते तथा अन्येषां मतानि प्रमाणेन तिरष्कुर्वन्ति। नैयायिकस्वीकृतेषु प्रमाणेषु अनुमानस्यैव अभ्यर्हितत्वम्। तच्चानुमानं व्याप्तिज्ञानसाध्यम् इत्यत्र नास्ति विदां वादः। किन्तु किंस्वरूपा इयं व्याप्तिरिति विषये तु विदां वादः सुलभ एव। अतो हि नव्यन्यायप्रवर्तकैः गङ्गेशोपाध्यायैः *तत्त्वचिन्तामणिग्रन्थस्य* अनुमानखण्डे पूर्वपक्षिणां मतान्यालोच्य तिरस्कृत्य च व्याप्तेः सिद्धान्तलक्षणं निरूपितम्। तत्रादौ प्राचां व्याप्तिलक्षणानि पञ्च अनूद्य दोषं प्रदर्श्य च तिरस्कृतानि। ततश्च सिंहव्याघ्रलक्षणद्वयमनूद्य तिरस्कृतम्। अत्र प्रबन्धे मथुरानाथदिशा व्याघ्रव्याप्तिलक्षणं व्याख्यातम्। मथुरानाथदिशा व्याघ्रव्याप्तिलक्षणसमासं निरूप्य नैकाः शङ्का उत्थाप्य च तत्समाधिः प्रतिपादितः। ततश्च मथुरानाथदिशा व्याघ्रव्याप्तिलक्षणस्याकिञ्चित्करत्वं प्रतिपादितम्।

**कुञ्चिकाशब्दः**

साध्यम्, अधिकरणत्वम्, वैयधिकरणत्वम्, सामानाधिकरण्यम्, केवलान्वयित्वम्, अव्याप्तिः, अनधिकरणत्वम्, साध्यतावच्छेदकसम्बन्धावच्छिन्नत्वम्।

## भूमिका-

सर्वे दार्शनिका हि स्वेषां मतं प्रमाणेन समर्थयन्ते तथा अन्येषां मतानि प्रमाणेन तिरष्कुर्वन्ति। नैयायिकस्वीकृतेषु प्रमाणेषु अनुमानस्यैव अभ्यर्हितत्वम्। तच्चानुमानं व्याप्तिज्ञानसाध्यम् इत्यत्र नास्ति विदां वादः। ननु किंस्वरूपा इयं व्याप्तिरिति विषये तु विदां वादः सुलभ एव। अतो हि नव्यन्यायप्रवर्तकैः गङ्गेशोपाध्यायैः *तत्त्वचिन्तामणिग्रन्थस्य* अनुमानखण्डे पूर्वपक्षिणां मतान्यालोच्य तिरस्कृत्य च व्याप्तेः सिद्धान्तलक्षणं निरूपितम्। तत्रादौ प्राचां व्याप्तिलक्षणानि पञ्च अनूद्य दोषं प्रदर्श्य च तिरस्कृतानि। ततश्च सिंहव्याघ्रलक्षणद्वयमनूद्य तिरस्कृतम्। तयोरत्र व्याघ्रलक्षणं मथुरानाथदिशा यथामति अधस्तात् परिष्क्रियते।

व्याघ्रोपाधिकेन केनचिद् नैयायिकेन *साध्यवैयधिकरण्यानधिकरणत्वमि*ति व्याप्तिलक्षणं कृतम्। सिंहलक्षणमिव अस्यापि लक्षणस्य व्याघ्रलक्षणम् इत्यभिधा प्रसिद्धिं गता। नैयायिकप्रवराणां माणिक्यशास्त्रिणां शिष्यस्य प्रख्यातयशसः रामलालशर्मणः नये तु मणिधररचितम् इदं व्याघ्रलक्षणम्।

### लक्ष्ये लक्षणसमन्वयप्रदर्शनम् -

साध्यवैयधिकरण्यानधिकरणत्वमिति सप्तमे व्याघ्रप्रणीते व्याप्तिलक्षणे प्रविष्टस्य साध्यवैयधिकरण्यमिति पदस्य यदि साध्यवद्भिन्नवृत्तित्वमर्थः स्वीक्रियते तथा अनधिकरणत्वम् इत्यस्य अधिकरणत्वप्रवेशस्य निष्प्रयोजनकत्वात् तद्वद्भिन्नत्वम् इत्यर्थः स्वीक्रियते तर्हि व्याघ्रलक्षणस्य अर्थो साध्यवद्भिन्नवृत्तित्ववद्भिन्नत्वमिति । उक्तार्थे स्वीकृते लक्षणसमन्वय इत्थं भवति - पर्वतो वह्निमान् धूमादित्यत्र सद्धेतुकस्थले

साध्यं - वह्निः